संस्कृतम्

द्वितीयं प्रश्नपत्रम्

(साहित्यम्)

समयः होरात्रयम् (घंटा-त्रयम्)

पूर्णाङ्काः 250

प्रश्नपत्र-सम्बन्धिताः विशेषनिर्देशाः

कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः

खण्डद्वये विभाजिताः **अष्टौ प्रश्नाः।**

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

प्रथम-पञ्चमौ प्रश्नौ अपरिहार्यौ। अवशिष्टेषु प्रश्नेषु **त्रयः** प्रश्नाः समाधेयाः। प्रतिखण्डम् **एकः** प्रश्नः अवश्यं ग्रहणीयः।

प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः।

चतुर्थ-पञ्चम-षष्ठप्रश्नाः संस्कृतभाषायां देवनागरीलिप्या समाधेयाः। अवशिष्टप्रश्नानामुत्तरं संस्कृतभाषायां देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम्।

प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिह्नं (×) विधेयम्।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत्।

SANSKRIT

PAPER—II

(LITERATURE)

Time Allowed : Three Hours

Maximum Marks : 250

QUESTION PAPER SPECIFIC INSTRUCTIONS

Please read each of the following instructions carefully before attempting questions

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4**, **5** and **6** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

Optional Province · optionalprovince.com

खण्ड—A / SECTION—A

1. अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (*150*) शब्दैः विधीयताम्— 10×5=50

(a) ''उदात्त-सुकोमलकल्पनाकलितत्वात् कुमारसम्भवमाधुनिकरुचिं नितान्तं परिप्रीणाति'' इति सोदाहरणं प्रतिपादयत।

(b) ''नारिकेलफलसम्मितं वचो भारवेः''—इति मतस्य याथार्थ्यं सयुक्तिकं सोदाहरणं च प्रतिपाद्यताम्।

(c) ''उदिते नैषधे काव्ये क्व माघः क्व च भारविः''—मतमिदं सयुक्तिकं सोदाहरणं च समीक्ष्यताम्।

(d) ''दशकुमारचरितं साहित्यिकदृष्ट्या वस्तुत एका परमप्रशंसनीया रचनास्ति'' इति समीक्ष्यताम्।

(e) ''नवसर्गगते माघे नवशब्दो न विद्यते''—सूक्तिमेतां सयुक्तिकं सोदाहरणञ्च प्रतिपाद्यताम्।

2. अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां कुरुत— 15+15+20=50

(a) ईशोपनिषदि प्रतिपादितं 'ब्रह्म'-स्वरूपं निरूप्यताम्।

(b) ''यन्मृच्छकटिकमुत्तमां कोटिं नयति तदस्ति तस्य कथावस्तु'' इति समीक्ष्यताम्।

(c) कथमिदं महर्षिवाल्मीकिप्रणीतं सुन्दरकाण्डं 'सुन्दर'मस्ति? इति विशदं समालोचयत।

3. अधस्तात् निर्दिष्टानां विषयाणां समीक्षा विधेया— 15+15+20=50

(a) ''काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला''—इत्येषा सूक्तिः युक्तिपुरस्सरं विवेचनीया।

(b) ''भारतामृतसर्वस्वं गीता''—अस्याशयः स्पष्टीकरणीयः।

(c) ''नीतिशतके प्रतिबिम्बितः भर्तृहरेः अनुभवसंसारः'' इति सोदाहरणं प्रतिपादयत।

4. अधस्तनानां विवेचनं संक्षेपेण **संस्कृतभाषयैव** देवनागरीलिप्यामेव च कर्तव्यम्— 15+15+20=50

(a) ''मेघदूतं प्रकृतेरनुपमा रङ्गशालेव भाति''—इति सोदाहरणं समीक्ष्यताम्।

(b) ''स्पष्टभावरसा चित्रैः पदन्यासैः प्रवर्तिता।
नाटकेषु नटस्त्रीव भारती भवभूतिना॥''
सोदाहरणं समीक्ष्यताम्।

(c) ''अमरुककवेरेकः श्लोकः प्रबन्धशतायते'' इति सयुक्तिकं सोदाहरणं च समीक्ष्यताम्।

Optional Province · optionalprovince.com

खण्ड—B / SECTION—B

5. नागराक्षरैः **संस्कृतभाषायां** प्रत्येकं सार्धशतेन (*150*) शब्दैः व्याख्यायताम्— 10×5=50

(a) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

(b) मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

(c) अस्त्युत्तरस्यां दिशि देवतात्मा,
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य,
स्थितः पृथिव्या इव मानदण्डः॥

(d) स किंसखा साधु न शास्ति योऽधिपं,
हितान्न यः संशृणुते स किम्प्रभु।
सदानुकूलेषु हि कुर्वते रतिं,
नृपेष्वमात्येषु च सर्वसम्पदः॥

(e) तथापि जिह्मः स भवज्जिगीषया,
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसंगमाद्,
वरं विरोधोऽपि समं महात्मभिः॥

6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः **संस्कृतभाषायामेव** विधेया— 15+20+15=50

(a) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरः॥

(b) नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥

(c) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्माऽपि तं नरं न रञ्जयति॥

Optional Province · optionalprovince.com

7. अधोलिखितानामाशयः ससंदर्भं प्रतिपादनीयः — 15+15+20=50

(a) धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥

(b) मन्दप्रख्यायमानेन रूपेण रुचिरप्रभाम्।
पिनद्धां धूमजालेन शिखामिव विभावसोः॥

(c) गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम्, अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरूकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अतीतज्योतिरालोकः, नोद्वेगकरः प्रजागरः।

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या— 15+15+20=50

(a) किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः॥

(b) अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥

(c) म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि॥

★★★

Optional Province · optionalprovince.com